अ०
॥२४

पु. ८.२ नं ४०

गी०

॥इति अवधूतगीता समाप्तिमगमत्॥

॥२४॥

॥श्रीगणेशायनमः॥अस्य श्रीअवधूतगीतामालामंत्रस्य अवधूतऋषिः॥अनुष्टुपछंदः
श्रीभगवान्निरंजनोदेवता॥ॐबीजं॥क्लींशक्तिः॥दत्तात्रेयेतिकीलकं॥ममदत्तात्रेयप्रसाद
सिध्यर्थेजपेविनियोगः॥ॐह्रांअंगु॥ॐह्रींतर्ज॥ॐह्रूंमध्य॥ॐह्रैंअना॥ॐह्रौंकनि॥
ॐह्रः करत॥एवंहृद॥अथध्या॥दत्तोनामस्मरणमेवंकुर्वतोसंन्निधानेगुठाका
स्वरविलसहसावोछिलान्हालुकामान्॥नित्याकारंनिरूपमयशःसंपदामालुहेतुंस्ता
त्रेयंवरदमनिशंभावयामिप्रसन्नं॥श्रीदत्तात्रेयउवाच॥अब्रह्मभुवनान्लोकान्संपूर्ण
परमात्मनि॥भिन्नाभिन्नंनपश्यामिलदहंपंचमाश्रमं॥निरालंबंनिराभासंनिराकारं

॥१२॥

निरंजनं॥ निराश्रयमुच्यते मायाहितदहं॥२॥ मनस्वमनमध्यस्थं मनोमायाविवर्जितं॥ मुनया
स्वयमालोक्यस्तदहं॥३॥ चिन्मयं व्यापितं सर्वं अकारां जगदीश्वरं॥ निर्विकारस्वयंज्योति
स्तदहं॥४॥ स्वयं दातो स्वयं भोक्ता स्वयं देव महेश्वरः॥ निर्विकल्पस्वयंबोधि स्तदहं॥५॥
क्वचिद्योगी क्वचिद्भोगी क्वचिन्नग्नपिशाचवत्॥ कामाधारा तत्स्वरूपेण तदहं॥६॥ दत्तात्रे
योहरिः साक्षाद्वसते सह्यपर्वते॥ अनुसूयागर्भरत्नं योगमोक्षवरप्रद॥७॥ अवधूतोनि
मूलस्थ्ये किमर्थं चतुराक्षर॥ आशापाशविनिर्मुक्तो आदिमध्यांतवर्जितः॥८॥ आनंदोव
र्ततेनित्यं अकारस्तस्यलक्षणं॥ वासनावर्जितं येन वक्तव्यं च निरामयं॥९॥ वर्तमानेप्रवर्त

॥१२॥

तेवकारस्तस्यलक्षणं॥ धारणाध्याननिर्मुक्तो धकारस्तस्यलक्षणं॥१०॥ तत्वचिंताव
तो येन नान्यचिंतापरित्यजेत्॥ तमोहंकारनिर्मुक्तो तकारस्तस्यलक्षणं॥११॥ इतिश्री
अवधूतगीतायां दत्तात्रेयगोरक्षसंवादे स्वरूपवर्णनं नामकं समाप्तं॥ श्रीकृष्णार्पणम
श्रीगणेशायनमः॥ श्रीगुरुदत्तात्रेयायनमः॥ ॐ ईश्वरानुग्रहादेव पुंसामद्वैतवा
सना॥ महाभयपरित्राणाद्विप्राणामुपजायते॥१॥ क्वचिद्योगी क्वचिद्भोगी क्वचिन्न
ग्नपिशाचवत्॥ दत्तात्रेयोहरिः साक्षान्नान्यत्परतरं क्वचित्॥२॥ यनेदं पूरितं विश्वं
मासनेवासनात्मनी॥ निराकारं कथं वंदे स्वाभिन्नं शिवमव्ययं॥३॥ पंचभूतात्मकं वि

भंमरीचिजलसंनिभं ॥ कस्याप्यहो नमस्कारमहमेको निरंजनः ॥ ४ ॥ वेदांतसारसर्वस्वंज्ञा
नविज्ञानमेवच ॥ अहमात्मा निराकारः सर्वव्यापिस्वभावतः ॥ ५ ॥ अहमेवकेवलं सर्वं भेदाभेदौ न
विद्यते ॥ अस्ति नास्ति कथं ब्रूयां विस्मयः प्रतिभाति मे ॥ ६ ॥ यो वै सर्वात्मको देवो निष्कलो गगनो
पमः ॥ स्वभावनिर्मलः शुद्धः स एवाहं न संशयः ॥ ७ ॥ अहमेवाव्ययोनंतः शुद्धविज्ञानविग्रहः
सुखं दुःखं न जानामि कथं कस्यापि वर्तते ॥ ८ ॥ न मानसं कर्म शुभाशुभं मे न वाचिकं कर्म शुभा
शुभं मे ॥ न कायिकं कर्म शुभाशुभं मे ज्ञानामृतं शुद्धमतींद्रियोहं ॥ ९ ॥ मनो वै परमाकाशं मनो
वै विश्वतोमुखं ॥ मनो वै गगनाकारं न मनः परमार्थतः ॥ १० ॥ मनसो हि लयं जाने कथं कस्यापि

वर्तते ॥ न हि सर्वमसर्वं च ह्यात्मा वै केवलं यतः ॥ ११ ॥ अहमेकमिदं सर्वं व्योमाकारं निरंतरं ॥ प
श्यामि कथमात्मानं प्रत्यक्षं वा तिरोहितं ॥ १२ ॥ त्वमेव सर्वं हि कथं न बुध्यसे समं हि सर्वेषु वि
मृष्टमव्ययं ॥ सदोदितोसि त्वमखंडितः प्रभो दिवा च नक्तं च कथं हि मन्यसे ॥ १३ ॥ आत्मानं सत
तं विद्धि सर्वमेकं निरंतरं ॥ अहं ध्याता परं ध्येयमखंडं खंड्यते कथं ॥ १४ ॥ न जातोसि मृतोसि
त्वं न ते देहः कदाचन ॥ सर्वं ब्रह्मेति विख्यातं ब्रवीति बहुधा श्रुतिः ॥ १५ ॥ स बाह्याभ्यंतरोसि
त्वं शिवः सर्वत्र सर्वदा ॥ इतस्ततः कथं भ्रांतः प्रधावसि पिशाचवत् ॥ १६ ॥ संयोगश्च वियो
गश्च वर्तते न हि ते न मे ॥ न त्वं नाहं जगन्नेति सर्वमात्मैव केवलं ॥ १७ ॥ शब्दादिपंचकस्यास्य

॥३॥

नैवास्ति न च मे सुखं ॥ त्वमेव परमं तत्त्वं मनः किं परितप्यसे ॥१८॥ जन्ममृत्युर्न ते चित्तं बंधमोक्षौ
शुभाशुभं ॥ कथं रोदिषि रे वत्स नाम रूपं न ते न मे ॥१९॥ अहो चित्त कथं भ्रांतः प्रधावसि पिशा
चवत् ॥ अभिन्नं पश्य चात्मानं रागत्यागात्सुखी भव ॥२०॥ त्वमेव तत्त्वं हि विकारवर्जितं निष्कं
पमेकं हि विमोक्षविग्रहं ॥ न ते च रागो ह्यथवा विरागः कथं हि संतप्यसि कामकामतः ॥२१॥
वदंति श्रुतयः सर्वा निर्गुणं शुद्धमव्ययं ॥ अशरीरं समं तत्त्वं तन्मां विद्धि न संशयः ॥२२॥ सा
कारमनृतं विद्धि निराकारं निरंतरं ॥ एतत्तत्त्वोपदेशेन न पुनर्भवसंभवः ॥२३॥ एकानेकं
समं तत्त्वं वदंति हि विपश्चितः ॥ रागत्यागात्पुनश्चित्तमेकानेकं न विद्यते ॥२४॥ अनात्मरूपं हि

॥३॥

कथं समाधिरात्मस्वरूपं हि कथं समाधिः ॥ अस्तीति नास्तीति कथं समाधिर्मोक्षस्व
रूपं यदि सर्वमेकं ॥२५॥ विशुद्धोसि समं तत्त्वं विदेहस्त्वमजोव्ययः ॥ जानाम्यहं न जाना
मि मात्मानं मन्यसे कथं ॥२६॥ तत्त्वमस्यादिवाक्येन स्वात्मा हि प्रतिपादितः ॥ नेति नेति
श्रुतिर्ब्रूयादनृतं पांचभौतिकं ॥२७॥ आत्मन्येवात्मना सर्वं त्वया पूर्णं निरंतरं ॥ ध्याता ध्या
नं न ते चित्तं निर्लज्जं ध्यायते कथं ॥२८॥ शिवं न जानामि कथं वदामि शिवं न जानामि कथं भ
जामि ॥ अहं शिवश्चेत्परमार्थतत्त्वं समस्वरूपं गगनोपमं च ॥२९॥ नाहं तत्त्वं समं तत्त्वं कल्प
नाहेतुवर्जितं ॥ ग्राह्यग्राहकनिर्मुक्तं स्वसंवेद्यं कथं भवेत् ॥३०॥ अनंतरूपं न हि वस्तु किंचि

द.

॥ ४

गी.

तत्त्वस्वरूपं नहि वक्तुं किंचित् ॥ आत्मैकरूपं परमार्थतत्त्वं न हिंसको वापि न चापि हिंस्यः ॥ ३१ ॥ विशुद्धोऽहं समं तत्त्वं विदेहं विभ्वनो मुखं ॥ विभ्रमं कथमात्मानं विभिन्नोऽहं कथं पुनः ॥ ३२ ॥ घटे भिन्ने यथाकाशं स्वे लीनं भेदवर्जितं ॥ शिवेन मनसा शुद्धो न भेदः प्रतिभाति मे ॥ ३३ ॥ न घटो न घटाकाशो न जीवो जीवविग्रहः ॥ केवलं ब्रह्म संविद्धि वेद्यवेदकवर्जितं ॥ ३४ ॥ सर्वत्र सर्वदा सर्वमात्मानं सततं ध्रुवं ॥ सर्वं शून्यमशून्यं च तन्मां विद्धि न संशयः ॥ ३५ ॥ वेदा न लोका न सुरा न यज्ञा वर्णाश्रमो नैव कुलं न जातिः ॥ न धूममार्गो न च दीप्तिमार्गो ब्रह्मैकरूपं परमार्थतत्त्वं ॥ ३६ ॥ व्याप्यव्यापक निर्मुक्तं त्वमेकं च केवलं ॥ प्रत्यक्षं वा परोक्षं वा आत्मानं मन्यसे कथं ॥ ३७ ॥ अद्वैतं केचिदिच्छंति

॥ ४ ॥

द्वैतमिच्छंति चापरे ॥ समं तत्त्वं न विंदंति द्वैताद्वैतविवर्जितं ॥ ३८ ॥ श्वेतादिवर्णरहितं शब्दादिगुणवर्जितं ॥ कथयंति कथं तत्त्वं मनोवाचामगोचरं ॥ ३९ ॥ यदानृतमिदं सर्वं देहादिगगनोपमं ॥ तदा हि ब्रह्म संवेत्ति न ते द्वैतपरंपरं ॥ ४० ॥ परेण सहजात्मापि ह्यभिन्नः प्रतिभाति मे ॥ व्योमाकारं तथैवैकं ध्याता ध्यानं कथं भवेत् ॥ ४१ ॥ यत्करोमि यदश्नामि यज्जुहोमि ददामि यत् ॥ एतत्सर्वं न मे किंचिद्विशुद्धोऽहमजोऽव्ययः ॥ ४२ ॥ सर्वं जगद्विद्धि निराकृतीदं सर्वं जगद्विद्धि विकारहीनं ॥ सर्वं जगद्विद्धि विशुद्धदेहं सर्वं जगद्विद्धि शिवैकरूपं ॥ ४३ ॥ तत्त्वं त्वं न संदेहः किं जानाम्यहमात्मनः ॥ असंवेद्यं स्वसंवेद्यमात्मानं मन्यसे कथं ॥ ४४ ॥ षडंगयोगान्न तु नैव शुद्धं

स्व

ज्ञानं तु नैव बुद्धं ॥ मनो विना ज्ञानं तु नैव बुद्धं स्वयं हि तत्त्वं स्वयमेव बुद्धं ॥४५॥ नहि स्थूलात्मको देहो
विदेहो वर्तते नहि ॥ आत्मैव केवलं सर्वं तुर्यातीतं कथं त्रयं ॥४६॥ मायातीतं कथं मे निर्मा
यास्थानं न विषये ॥ तत्त्वमेकमिदं सर्वं व्योमाकारं निरंतरं ॥४७॥ आदिमध्यांतमुक्तोहं न बद्धो
हं कदाचन ॥ स्वभावनिर्मलः शुद्ध इति मे निश्चिता मतिः ॥४८॥ महदादि जगत्सर्वं न किंचित्
प्रतिभाति मे ॥ ब्रह्मैव केवलं सर्वं कथं वर्णाश्रमस्थितिः ॥४९॥ नाहं मनुष्यो न च देवयक्षो न
ब्राह्मणक्षत्रियवैश्यशूद्रः ॥ न ब्रह्मचारी न गृही वनस्थो भिक्षुर्न चाहं निजबोधरूपः ॥५०॥
जानामि सर्वं हि सर्वमहमेकं निरंतरं ॥ निरालंबमशून्यं च शून्यं व्योमादि पंचकं ॥५१॥ न पुंसः

क: पुमान्स्त्री न न बंधो नैव कल्पना ॥ सानंदं वा निरानंदं आत्मानं मन्यसे कथं ॥५२॥ न बद्धोहं
न मुक्तोहं न चाहं ब्रह्मणः पृथक् ॥ न कर्ता न च भोक्ता च व्याप्यव्यापकवर्जितः ॥५३॥ यथा जलं
जले न्यस्तं सलिलं भेदवर्जितं ॥ प्रकृतिः पुरुषस्तद्वदभेदः प्रतिभाति मे ॥५४॥ जानामि तत्परं
रूपं प्रत्यक्षं गगनोपमं ॥ यच्चापरं हि तद्रूपं मरीचिजलसन्निभं ॥५५॥ न गुरुर्नोपदेशश्च न चो
पाधिर्न च क्रिया ॥ विदेहं मां विजानीहि विशुद्धोहं स्वभावतः ॥५६॥ विशुद्धोसि परोसि तन्न
ते चिंत्यं कदाचन ॥ अहं वात्मा परं तत्त्वमिति वक्तुं न लज्जसे ॥५७॥ यदि योगेन मुक्तोसि न
बद्धोसि कदाचन ॥ अहं चात्मा परं तत्त्वमिति वक्तुं न शक्यते ॥५८॥ कथं वादं विरचितं आ

॥८॥ ॥द्वि॥ गी॰

स्नेयवासनानव॥ पिबवयसकलातीतमद्वैतंपरमामृतं॥५९॥ नैवबंधोनचाबंधोनबोधोबोधएवच॥ यस्यनि
र्वासनाबोधःसबोधोनान्यथाभवेत्॥६०॥ ध्यानेनपरिकीर्तनस्समाधिर्योगोनदेशकालोनगुरूपदेशः॥ स्वभावसं
पत्तिरहंचतत्त्वमाकाशकल्पंसहजंध्रुवंच॥६१॥ नाहंजातोमृतोवापिनमेकर्मशुभाशुभं॥ शुद्धोहंनिर्गुणंब्रह्म
बंधमुक्तिःकथंमम॥६२॥ यदिसर्वगतोदेवःस्थिरःपूर्णोनिरंतरः॥ अंतरंनैवपश्यामिसबाह्याभ्यंतरःकथं॥६३॥
स्फुरत्येकजगत्सर्वमखंडितनिरंतरं॥ अहोमायामयोमोहःअद्वैतंद्वैतकल्पना॥६४॥ साकारंचनिराकार
नेतिनेतीतिसर्वदा॥ भेदाभेदविनिर्मुक्तोवर्ततेकेवलःशिवः॥६५॥ नतेचमातानपितानबंधुर्नतेचपत्नीनच
पुत्रमित्रं॥ नपक्षपातोनविपक्षपातःकथंहिसंतप्तिरियंचचित्ते॥६६॥ दिवानक्तंनतेचित्तमुदयास्तमयौन

॥द्वि॥

हि॥ विदेहस्यशरीरस्यकल्पयंतिकथंबुधाः॥६७॥ नाविभक्तंविभक्तंचनहिदुःखसुखादिच॥ नहिसर्वमस
र्वंचविद्धिचात्मानमव्ययं॥६८॥ नाहंकर्तानभोक्तावानमेकर्मपुराधुना॥ नमेदेहोविदेहोवानिर्ममे
तिममेतिकिं॥६९॥ नमेरागादिकोदोषोदुःखंदेहादिकंनहि॥ आत्मानंविद्धिमामेकंविशालंगगनोपमं
॥७०॥ सखेमनःकिंबहुजल्पितेनसखेमनःसर्वमिदंवितथ्यं॥ यत्सारभूतंकथितंमयातेत्वमेवतत्त्वंगग
नस्वरूपं॥७१॥ येनकेनापिभावेनयत्रकुत्रमृताःपुनः॥ योगिनस्तत्रलीयंतेघटाकाशमिवांबरे॥७२॥
धर्मार्थकाममोक्षांश्चद्विपदादिचराचरं॥ मन्यंतेयोगिनःसर्वंमरीचिजलसन्निभं॥७३॥ अतीतानागतंकर्म
वर्तमानंतथैवच॥ नकरोमिनभुंजामिइतिमेनिश्चलामतिः॥७४॥ तीर्थेचांडालगेहेवायदिज्ञानंस्वचेतनः॥

द्वि

(8)

द॰
।८॥

गी॰

परित्यजन्देहमिमं ज्ञानादेव विमुच्यते ॥७५॥ शून्यागारे समरसपूतस्तिष्ठन्नेकः सुखमवधूतः
चिरति हि नग्नस्त्यक्त्वा गर्वं विंदति केवलमात्मनि सर्वं ॥७६॥ त्रितयतुरीयं नहि नहि यत्र विंदति
केवलमात्मनि तत्र । धर्माधर्मौ नहि नहि यत्र बंधो मोक्षः कथमिह तत्र ॥७७॥ विंदति २ नहि २
मंत्रं छंदोलक्षण नहि २ तंत्रं । समरसमग्नो भावितपूतः प्रलपितमेतत्परमवधूतः ॥७८॥ स
र्वशून्यमशून्यं च सत्यासत्यं न विद्यते । स्वभावभावितः प्रोक्तं शास्त्रसंवित्तिपूर्वकं ॥७९॥ इति
श्रीमद्दत्तात्रेयविरचिते वेदांतशास्त्रे गुरुशिष्यसंवादे स्वात्मसंवित्युपदेशो नाम अवधूतगी
तायां प्रथमोध्यायः ॥१॥ श्रीमद्दत्तात्रेयार्पणमस्तु । श्रीगुरुदेवदत्त अवधूत दत्त । १ । १

।८।

॥ श्रीदत्त ॥ बालस्य भोगविषयेभिरतस्य वापि मूर्खस्य सेवकजनस्य गृहस्थितस्य । एतद्गुरोः कि
मपि नैव विचिंतनीयं रत्नं कथं त्यजति कोप्यशुचिप्रविष्टं ॥१॥ नैवात्र काव्यगुण एव विचिंतनीयो ग्रा
ह्यः परं गुणवता खलु सार एव । सिंदूरचित्ररहिता भुवि रूपशून्या पारं न किं नयति नौरिह गंतु
कामान् ॥२॥ प्रयत्नेन विना येन निश्चलेन चलाचलं । ग्रस्तं स्वभावतः शांतं चैतन्यं गगनोपमं ॥३॥
अयत्नाच्चलयेद्यस्तु एकमेव चराचरं । सर्वगं तत्कथं भिन्नमद्वैतं वर्तते मम ॥४॥ अहमेव परं यस्मा
त्सारात्सारतरं शिवं । गमागमविनिर्मुक्तं निर्विकल्पं निराकुलं ॥५॥ सर्वावयवनिर्मुक्तं तदा
हं त्रिदशार्चितं । संपूर्णत्वान्न गृह्णामि विभागं त्रिदशादिकं ॥६॥ समाधीनां समेहं किं करिष्या

(७)

द·   गी:
॥८॥   ॥८॥

मवलिमान्॥उत्पद्यंते विलीयंते बुद्बुदाश्च यथा जले॥७॥महदादीनि भूतानि समाप्यैकः सदैव हि॥
मृदुद्रव्येषु तीक्ष्णेषु गोऽपेषु कटुकेषु च॥८॥कटुकत्वं च गौउयत्वं तीक्ष्णत्वं मार्दवं जलं॥प्रवृत्तेः पुरुष
स्तद्वदनेदः प्रतिभाति मे॥९॥सर्वथा रहितं यत्तत्सूक्ष्मात्सूक्ष्मतरं परं॥मनोबुद्धींद्रियातीतं कमलं
कं जगत्पतिं॥१०॥अदृश्यं सहजं यत्र अहं तत्र कथं भवेत्॥त्वमेव हि कथं तत्र कथं तत्र चराचरं॥११॥
गगनोपमं च सः प्रोक्तं तदेव गगनोपमं॥चैतन्यं दोषहीनं च सर्वसंपूर्णमेव च॥१२॥पृथिव्यां वर्तितं
नैव मारुतेन न वारितं॥वारिणा क्लेदितं नैव तेजोमध्ये व्यवस्थितं॥१३॥आकाशं तेन संव्याप्तं न त
द्व्याप्तं च केनचित्॥स बाह्याभ्यंतरं तिष्ठत्यविच्छिन्नं निरंतरं॥१४॥सूक्ष्मत्वात्तददृश्यत्वान्निर्गुणत्वा

च्च योगिभिः॥आलंबनादि यत्प्रोक्तं क्रमादालंबनं त्यजेत्॥१५॥सतताभ्यासयुक्तस्तु निरा
लंबो यदा भवेत्॥तदा विलीयते चेतो गुणदोषविवर्जितं॥१६॥विषस्य विश्वरौद्रस्य महामोह
मदस्य च॥एकमेव विनाशाय अमोघं सहजामृतं॥१७॥भावगम्यं निराकारं साकारं दृष्टि
गोचरं॥भावाभावविनिर्मुक्तं अंतरालं तदुच्यते॥१८॥ब्राह्यभावं भवेद्विश्वं मलः प्रकृतिरुच्यते॥
अंतरादंतरं ज्ञेयं नारिकेलजलं यथा॥१९॥भ्रांतिज्ञानं स्थितं बाह्यं सम्यक्ज्ञानं च मध्यमं॥
मध्यामध्यतरं ज्ञेयं नारिकेलफलं यथा॥२०॥पौर्णमास्यां यथा चंद्र एक एवातिनिर्मलः॥त
त्सैमिरिकः पश्येत् द्विधा दृष्टिविपर्ययात्॥२१॥अनेनैव प्रकारेण बुद्धिभेदेन सर्वतः॥एवाक

॥१९॥

द्विधमानं च गीयते नाम कोटिभिः ॥२२॥ गुरुमत्ताप्रसादेन मूर्खो वा यदि पंडितः ॥ यस्तु संबुध्यते तत्वं
विरक्तो भवसागरात् ॥२३॥ रागद्वेषविनिर्मुक्तः सर्वसत्वहिते रतः ॥ हृष्टंशुद्धाधिकारी च स गच्छेत्
परमं पदं ॥२४॥ घटे भिन्ने यदाकाशमाकाशे लीयते यथा ॥ देहाभावे तथा देही स्वरूपे परमात्मनि ॥२५॥
युक्तं यत्कर्मयुक्तानां मलिनं च सा गतिः ॥ नैवोक्तं कर्मयुक्तानां मलिनं नापि सा गतिः ॥२६॥ योग
तिः कर्मयुक्तानां सा च वागींद्रियावधि ॥ योगिनां या गतिः क्वापि अगम्या भावचेष्टिता ॥२७॥ ए
वं ज्ञात्वा तु मार्गेण योगिनामेव कल्पितं ॥ विकल्पितं विजानीयात् स्वयं सिद्धः प्रजायते ॥२८॥ तीर्थे चां
डालगेहे वा यत्र कुत्र मृतोपि वा ॥ न योगी पश्यते गर्भे परे ब्रह्मणि लीयते ॥२९॥ सहजस्कस्वमचिंत्यसं

॥१९॥

स्तु पश्यते स्वरूपं विहरति च यथेष्टं लिप्यते नैव दोषैः ॥ सकृदपि च विनावाक्कर्म किंचित्तु कार्यंत
दपि न वलितुं नाम नित्यरूपस्वभावं ॥३०॥ निरामयं निःप्रतिमं निराश्रयं निराकृति निर्विषयं निरा
मिषं ॥ निर्द्वंद्व निर्लोभ मखुस शांतिकं तमीशमात्मानमुपैति शाश्वतं ॥३१॥ वेदो न दीक्षा न च मुं
डनं क्रिया गुरुर्न शिष्यो न च मंत्रयंत्रं ॥ मुद्रादिकं वा न च यत्र भासते तमीशं ॥३२॥ न शांतिनो वा
शांतिकं भवरवा न चोग्ररूपं वियदादिकं वा ॥ अरंभनिष्पत्ति घटादिकं नो तमीशं ॥३३॥ ज्ञेयस्यतत्त्वरूपाल
चराचरं जगदुत्पद्यते तिष्ठति लीयते पि वा ॥ पयो विकारादिव फेनबुद्बुदा तमीशं ॥३४॥ नानात्मने
कधर्मुतहस्वशून्यता स्थाणुत दीर्घमहत्त्वशून्यता ॥ मम हमानत्वसमत्वशून्यता तमीशं ॥३५॥ नंस

न्निरोधोनचदृष्टिरासनंबंधोपिवृंधोनचयत्रनासते॥ नाडिप्रचारोनचयत्रकिंचनत॥३६॥ सुसं
गृहीवायदिवानसंगृही निष्कर्मकोवायदिवासुकर्मकः॥ आत्मप्रबोधोनविमुच्यतेध्रुवं॥३७॥
मनोनबुद्धिर्नशरीरमिंद्रियं तन्मात्रभूतानिनभूतपंचकं॥ अहंकृतिश्चापिनचित्स्वरूपतं॥३८॥
विधिनिषेधःपरमात्मतांगते नयोगिनश्चेतसिभेदवर्जितं॥ शौचंनशौचंयदिलिंगभावनात॥३९॥
मनोनबंधोनफलंनमोक्षोनूनंकथंतत्रस्वरूपदर्शः॥ प्रियंकथामुक्तवतांगुरूणांतत्रास्पतंहिस्वयं
प्रकाशते॥४०॥ बिंदुर्नबिंदुर्नहिनाहिमंत्रं छंदोलक्षणनहितत्रं॥ समरसमग्नोभावितपूतः
प्रलपितमेतत्कथमवधूतः॥४१॥ इतिश्रीमद्दत्तात्रेयगीतास्वात्मसंवित्युपदेशोभेदखंडनंनामद्वितीयः॥

॥श्रीगुरुदेवदत्त॥ अवधूत॥ गुणविगुणविभागोवर्ततेनैवकिंचित्समविषमविभागःसर्वथानैवकिं
चित्॥ रतिविरतिविहीनंनिर्मलंनिःप्रपंचंकथमिहखलुवंदेव्योमरूपंशिवंवै॥१॥ श्वेतादिव
र्णरहितंनचयंशिवश्चकार्यंचकारणमिदंहियंशिवश्च॥ एवंविकल्पविगलाहियंशिवश्च
आत्मानमात्मनिसुमित्रकथंवदामि॥२॥ निर्मूलमूलरहितोहिसदोदितोहं निर्धूमधूमर
हितोहिसदोदितोहं॥ निर्दीपदीपरहितोहिसदोदितोहं ज्ञानामृतःसमरसोगगनोपमोहं॥३॥ निष्कामकाममिहनामकथंवदामि निःसंगसंगमिहनामकथंवदामि॥ निर्दो
षदोषमिहनामकथंवदामि ज्ञानामृतःसम॰॥४॥ अद्वैतरूपमखिलंहिकथंवदामिद्वैतस्वरू

दत्त
॥११॥

गी॰

पमखिलं हि कथं वदामि ॥ नित्यं ह्यनित्यमखि॰ ज्ञाना॰ ॥१५॥ स्थूलं हि नो न च सूक्ष्मं न गतागं
तं च नाद्यंतमध्यरहितं न परापरं च ॥ सत्यं वदामि खलु नो परमार्थतत्त्व ज्ञाना॰ ॥१६॥ सं
विद्धि सर्वकरणानि नभो निभानि संविद्धि सर्वविषयाणि नभो निभानि ॥ संविद्धि चैकम
मलं न हि बंधमुक्तं ज्ञाना॰ ॥१७॥ दुर्बोधबोधगहनो न भवामि तात दुर्लक्ष्यलक्ष्यगहनो
न भवामि तात ॥ आसन्नरूपगहनो न भवामि तात ज्ञाना॰ ॥१८॥ निष्कर्मकर्मदहनं ज्वल
नो भवामि निर्दुःखदुःखदहनं ज्वलनो भवामि ॥ निर्देहदेहदहनं ज्वलनो भवामि ज्ञाना॰
॥१९॥ निष्पापपापदहनं हि हुताशनोऽहं निर्धूमधूमदहनं हि हुताशनोऽहं ॥ निर्वाणबंधद

॥११॥

हनं हि हुताशनोऽहं ज्ञाना॰ ॥२०॥ निर्नाथनाथरहितो न भवामि वत्स निश्चिंत चिं
तनरहितो न भवामि वत्स ॥ निर्योगियोगरहितो न भवामि वत्स ज्ञाना॰ ॥२१॥ निर्मो
हमोहपदवीति न मे विकल्पो निःशोकशोकपदवीति न मे विकल्पः ॥ निर्लोभलोभपद
वीति न मे विकल्पो ज्ञाना॰ ॥२२॥ संसारसंततिसुखं न च मे कदाचित्संतापसंततिसुखं
न च मे कदाचित् ॥ अज्ञानबंधनमिदं न च मे कदाचित् ज्ञाना॰ ॥२३॥ संसारसंततिरजो
न च मे विकारः संतापसंततिमनो न च मे विकारः ॥ सत्त्वस्वधर्मजनकं न च मे कदाचित् ज्ञाना॰
॥२४॥ संतापदुःखजनकं न च मे कदाचित्संतोषमोहजनकं न च मे कदाचित् ॥ यस्मा

रहंसुलिरियंनचमेकदाचिज्ज्ञाना॥१५॥निष्कंपकंपरहनंनविकल्पकल्पंस्वप्नप्रबोधनिधः
नंनविकल्पकल्पः॥निःसारसारनिधनंनचराचरंहिज्ञाना॥१६॥नोवेद्यवेदकमिदंन
चहेतुलक्ष्यंवाचामगोचरमिदंनमनोनबुद्धिः॥एवंकथंहिभवतःकथयामितत्त्वंज्ञाना॥१७॥
यदेहिसर्वहरणस्वयमेवसर्वमेतोबहिर्वेदकथंपरमार्थदेही॥देहादिदुःखरहितस्वयमेव
तत्त्वंज्ञाना॥१८॥रागादिदोषरहितंस्वहमेवतत्त्वंसंसारशोकरहितस्वहमेवतत्त्वं॥देहादि
दोषरहितस्वहमेवतत्त्वंज्ञाना॥१९॥स्वप्नत्रयंयदिनचलिकथंतुरीयंकालत्रयंयदिनचेति
कथंदिशश्च॥शांतपरंयदिपरंपरमार्थतत्त्वंज्ञाना॥२०॥दीर्घोलघुःपुनरितीहनमेविक

क्षोकोणंचवर्तुलमितीहनमेविभागः॥विस्तारसंकोचमिदंनचमेविकल्पोज्ञाना॥
॥२१॥निःशुद्धशुद्धमविचारमनंतरूपंनिर्लेपलेपमविचारमनादिरूपं॥निखंडखंडम
विचारमनंतरूपंज्ञाना॥२२॥उल्लेखमात्रमपितेनचनामरूपंनिर्भिन्नभिन्नमपितेनह
हिवस्तुकिंचित्॥निर्भिन्नमानसकरोषिकथंविलापंज्ञाना॥२३॥ब्रह्मादयःसुरगणाः
कथमत्रसंतिस्वर्गादयोवसतयःकथमत्रसंति॥यद्येकरूपममलंपरमार्थतत्त्वंज्ञाना॥
॥२४॥निर्नेतिनेतिविमलंहिकथंवदामिनिःशांतशांतममलंपरमार्थतत्त्वं॥निर्लिंगलिंगम
विमलंपरमार्थतत्त्वंज्ञाना॥२५॥मातापिताचतनयानचमेकदाचिज्जातिर्मतंनचमनो

अ॰ गी॰

॥१३॥

नचमेकदाचित्॥ निर्मूलकुलं स्थिरमिदं परमार्थसहं ज्ञाना॥२६॥ निष्कर्मसततं हि कथं करो
मि॥ संगसंगरहितं परमं विदेहं॥ निर्देहिदेहललनासततं च नोहं ज्ञाना॥२७॥ मायाप्रपंचरच
ना न च मे विकारः कौटिल्यदंभरचना न च मे विकारः॥ सत्यानजीविरचना न च मे विकारः
ज्ञाना॥२८॥ अंतर्न बाह्यमखिलं हि निरामयं च विज्ञानरूपमखिलं ह्युपमानहीनं॥ संविद्धि
भ्रांतिरहितं नहि पूर्णपूर्णं ज्ञाना॥२९॥ सत्यं वदामि विरजा व च नैकजालं सत्यं वदामि सरजा
व च नैकजालं॥ सत्यं कथं हि सततं च सितासितं वै ज्ञाना॥३०॥ संध्यादिकोलरहितं न
वियोगयोगं स्वप्नप्रबोधरहितं बधिरांधमूकं॥ एनहिकल्परहितं निजभावरूपं ज्ञाना॥३१॥

॥१२

निर्नाथनाथरहितं हि निराकुलं वै निश्चिंतचित्तविगतं हि निराकुलं वै॥ संविद्धि सर्वविग
तं हि निराकुलं वै ज्ञाना॥३२॥ कांतारमंदिरमिदं हि कथं वदामि संसिद्धसंशयमिदं हि
कथं वदामि॥ एवं निरंतरमिदं हि निरंजनं वै ज्ञाना॥३३॥ निर्बीजबीजरहितं सततं विभा
ति निर्जीवजीवरहितं सततं विभाति॥ निर्वाणबंधरहितं सततं विभाति ज्ञाना॥३४॥ संभूति
वर्जितमिदं सततं विभाति संसारवर्जितमिदं सततं विभाति॥ संहारवर्जितमिदं सततं वि
भाति ज्ञानामृ॥३५॥ उल्लेखमात्रमपि ते न च नामरूपं निर्भिन्नभिन्नमपि ते नहि वस्तु किं
चित्॥ निर्लज्जमानस करोषि कथं विषादं ज्ञाना॥३६॥ किन्नाम रोदसि सखे न भुनास्तु

15

अ॰ ॥१४॥ गा॰

मानि किं नाम रोदिषि सखे न च जन्म मृत्यु॥ किं नाम रोदिषि सखे न च ते स्वरूपं ज्ञाना॥३७॥३ किं नाम रोदिषि सखे न च ते विकारो किं विरूपं॥ किं शिमित्रं ज्ञाना॥३८॥ किं मनांसि किं वचांसि॥ किं द्रियाणि ज्ञाना॥३९॥ किं त्रिकामो किं प्रकोपो॥ किं ना विमोहो ज्ञा॥४०॥ ऐश्वर्यमिच्छसि सखे न च ते धनानि ऐं ह्यमन्यत्॥ ऐं ममेति ज्ञाना॥४१॥ लिंगप्रपंचमनुमित्रं न ते च मे च निर्भेदं नेदमिह मिनं न ते च मे च॥ निर्लज्जमानसा विनालिकथंवि भिन्नं ज्ञा॥४२॥ ॥१४॥
नो चाणुमात्रमपि तोहि परागरूपं नो सरागरूपं नो विरागरूपं ज्ञाना॥४३॥ ध्यानं न ते स्तु हृदयं न च ते समाधिर्ध्येयं न वस्तु हृदयं न च ते च देशं॥ ध्याता न त्रिकालो ज्ञाना॥४४॥

यत्सारभूतममलं कथितं मया ते न त्वं न हि मिह मौ विनगुरु न शिष्यः॥ स्वच्छ स्वरूपममलं परमार्थतत्वं ज्ञाना॥४५॥ कथमिह परमार्थं तत्वमानंदरूपं क नैवमानंदरूपं॥ कः सत्यमानंदरूपं यो दिह परम मे कं वलं तं व्योमरूपं॥४६॥ दहनपवनहीनं विद्धि विज्ञानमेकं अवनिजलविहीनं विद्धि॥ गगनमयविशालं विद्धि यो दिह परम मे कं वलं तं व्योमरूपं॥४७॥ न शून्यरूपं न विशून्यरूपं न शुद्धरूपं न विशुद्धरूपं॥ रूपं विरूपं न नयामि किं चित्स्वच्छ स्वरूपं परमार्थतत्वं॥४८॥ मुंचमुंचामि संसारं त्यागं मुंचतु सर्वथा॥ त्यागात्यागविनिर्मुक्तमस्ति तत्वं त्वं यथा॥४९॥ विंदति विंद॥५०॥ इति श्रीदत्तात्रेयगीतायां ज्ञानामृतं॥३॥

अ·

।।१५।।

गी·

।।श्रीगणेशायनमः।। नावाहनंनैवविसर्जनंवपुष्पाणिपत्राणिकथंभवंति।। ध्यानंचमंत्राःकथंभवंतिसमासमंनैवशिवार्चनंवा।।१।। नकेवलंबंधविमुक्तिमुक्तोनकेवलंशुद्धविशुद्धमुक्तः।। नकेवलंयोगवियोगमुक्तःसवैविमुक्तोगगनोपमोहं।।२।। संजायतेसर्वमिदंवितथ्यंनजायतेसर्वमिदंवितथ्यं।। एवंविकल्पोममनैवजातोसंविद्धिनिर्वाणमनामयोहं।।३।। नसांजनंनैवनिरंजनंवानवांतरंवापिनिरंतरंवा।। अंतर्बहिर्भिन्नतमंवितथ्यंस्वरूपनिर्वाणमनामयोहं।।४।। अबोधबोधंममनैवजातंबोधस्वरूपंममनैवजातं।। निर्बोधबोधंचकथंवदामिस्वरूपेनिर्वाणमनामयोहं।।५।। नधर्मयुक्तोनेचपापयुक्तोनमोक्षयुक्तोनच

।।१५।।

बंधमुक्तः।। युक्तंत्वयुक्तंनचमेविभातिस्वरू०।।६।। परापरंवानचमेकदाचिन्मध्यस्थभावोनहिचारिमित्रं।। हिताहितंचापिकथंवदामिस्वरू०।।७।। नोपासकंनैवउपास्यरूपंनचोपदेशोनचमेक्रियाश्च।। संवित्स्वरूपंतिकथंवदामिस्वरू०।।८।। नव्यापकंव्याप्यमिहास्तिकिंचिन्नचालयंवापिनिरालयंवा।। अशून्यशून्यंकथंवदामिस्व०।।९।। नग्राहकंग्राह्यकमेवकिंचिन्नकारणंवाममनैवकार्यं।। अचिंत्यचिंत्यंचकथंवदामिस्व०।।१०।। नभेदकंवाममनैवभेद्यंनवेदकंवाममनैववेद्यं।। गतागतंतातकथंवदामिस्व०।।११।। ता·

नाहंचदेहोममनैवदेहोबुद्धिर्मनोमेनचमेंद्रियाणि।। रागंविरागंचकथंवदामिस्व०।।१२।।

अ॰ ॥१६॥

उल्लेखमात्रंनहिभिन्नमुच्चैरुल्लेखमात्रंनतिरोहितंच॥समासमंमित्रकथं॥१३॥जितेंद्रि
योवाविजितेंद्रियोवानसंत्यागोमेनियमोनजातः॥जयाजयोचित्तकथं॥१४॥अमूर्तिं
मूर्तिर्नचमेकदाचिन्नाद्यंतमध्यंनचमेकदाचित्॥चलाचलंचित्तकथं॥१५॥मत्तोमत्ते
वापिविषाविषंवासंजायतेतान्नमेकदाचित्॥अमृतद्वंद्वंचकथं॥१६॥संविद्धिमां
समाधियुक्तंसंविद्धिमांलक्ष्यविलक्ष्यमुक्तं॥योगंवियोगंचकथं॥१७॥संविद्धिमांसर्वविसर्व
मुक्तंसंध्यादिकंकर्मकथंकरोमि॥मायाविमायाचकथं॥१८॥सप्रबोधोममनैवनिद्रान
त्वंदिवायापिनमेविभाति॥अनुयैतुर्यंचकथं॥१९॥मूर्खोपिनाहंनचपंडितोहंमौनंवि

मौनंनचमेकदाचित्॥वितर्कतर्कंचकथं॥२०॥मातापितानैवकुलंनजातिःसंहारसंहृतिनमे
कदाचित्॥स्नेहंचमोहंचकथं॥२१॥अस्तंगतोनैवसदोदितोहंतमश्चतेजोनचमेकदाचित्॥
संध्यादिकंकर्मकथंकरोमिस्त॥२२॥असंशयंविद्धिनिराकुलंमामसंशयंविद्धिनिरंतरंमां॥
असंशयंविद्धिनिरंजनंमांस्त॥२३॥ध्यानानिसर्वाणिपरित्यजंतिशुभाशुभंकर्मपरित्यजंति॥
त्यागामृतंतातपिबंतिधीराःस्वरूप॥२४॥विंदतिविंदति॥२५॥इतिश्रीमद्दत्तात्रेयगोरक्ष
संवादेअवधूतगीतायांचतुर्थोध्यायः॥४॥श्रीगुरुदत्तात्रेयार्पणमस्तु॥५॥५॥२५॥
श्रीगणेशायनमः॥ॐकारखल्वितिगगनसमोनपरापरसारविसारमिति॥अविनाशवि

अ॰
॥१७॥

ज्वालनिराकरणंकथमक्षरबिंदुसमुच्चरणं॥१॥इहतत्त्वमसिप्रमुखश्रुतिभिः प्रतिपादितमा
रमनितत्त्वमसि॥त्वमुपाधिविवर्जितसर्वसमः किमुरोदिसिमानससर्वसमं॥२॥अधऊर्ध्व
विवर्जितसर्वसमं कुलवंश विवर्जितसर्वसमं॥यदिचैकविवर्जितसर्वसमः किमु॰॥३॥नहि
कल्पविकल्पविचारइतिनहि कारणकार्यविचारइति॥पदसंधिविवर्जितसर्वसमः कि॰॥४॥न
हिबोधविबोधसमाधिरितिनहि कालविकालसमा॥नहिदेशविदेशस॰ कि॰॥५॥नहिकुंभ
नभोनहिकुंभइतिनहि जीववपुर्नहि जीवइति॥नहिकारणकार्यविभागइति कि॰॥६॥इहसर्व
निरंतरमोक्षपदं लघुदीर्घविचारविहीनइति॥इहसर्वविसर्वविहीनइति कि॰॥७॥इहशून्यविशू

न्यविहीनइतिइहशुद्धविशुद्धवि॰॥नहिवर्तुलकोणविभागइति कि॰॥८॥नहिभक्तिविभक्ति
विचारइति बहिरंतरसंधिरहस्यमिति॥अरिमित्रविवर्जितसर्वसमं कि॰॥९॥नविशेषणवि
शेष्यरूपइतिनचराचरभेदविशेषइति॥इहमोक्षनिरंतरसर्वइति कि॰॥१०॥नगुणागुणपा
शनिबंधइतिमृतजीवनकर्मकरोमिकथं॥इहशुद्धनिरंतरसर्वसमः कि॰॥११॥इहभाववि
भावविहीनपरंइहकामविकारविहीनपरं॥इहमोक्षनिरंतरसर्वसमः कि॰॥१२॥इहतत्त्व
निरंतरसर्वसमं नहिसंधिविसंधिसमागमनं॥यदिसर्वविवर्जितसर्वसमंकि॰॥१३॥अनि
केतकुटीपरिचारसमं इहसंगविसंगविहीनपरं॥इहबोधविबोधविहीनपरं कि॰॥१४॥अ

गी॰
॥१७॥

अ.
॥१४॥

गी.

विकारविकारअसत्यमिति अविलक्षविलक्षअसत्यमिति ॥ यदि केवलमात्मनि सत्यमिति किं
॥१५॥ इह सर्वगतः खलु जीव इति इह जीव निरंतर जीव इति ॥ इह केवलमात्मनि बोध इति किं
॥१६॥ अविवेक विवेक अबोध इति अविकल्प विकल्प अबोध इति ॥ यदि चैक निरंतर बोध इति किं
॥१७॥ यदि वर्ण विवर्ण विहीन समं यदि भेद विभेद वि. ॥ यदि कारण कार्य वि. किं ॥१८॥ न हि मो
क्षपदं न हि बंधपदं न हि धर्मपदं न हि पापपदं ॥ न हि पूर्णपदं न हि रिक्तपदं किं ॥१९॥ इह सर्व हि

॥१४॥

केवल सर्व निरंतर इह केवल निर्मल स. ॥ वियदादि विवर्जित स. किं ॥२०॥ इति निर्मल निश्चल
सर्वगतं इति सर्व निरंतर स. ॥ दिनरात्रि विवर्जित सर्वसमं किं ॥२१॥ न हि बंध विबंध समागम

नं न हि योग वियोग समा. ॥ न हि तर्क वितर्क स. किं ॥२२॥ इह काल विकाल निराकरणं अनुमित्र
स्वशानुपनि. ॥ न हि केवल तत्त्वमिति किं ॥२३॥ इह देह विदेह विहीन परं इह जाग्रत् सुप्ति वि. ॥ अ
भिधान विचार वि. किं ॥२४॥ गगनोपमं शुद्ध विशाल समं अपि सर्व विवर्जित सर्वसमं ॥ गत सार
विकार विसार समं किं ॥२५॥ सुख दुःख विवर्जित सर्व समं इह शोक विशोक विहीन परं ॥ गुरु शि
ष्य विवर्जित सर्व समं किं ॥२६॥ गुणदोष विवर्जित तत्त्वमसि सुख दुःख विवर्जित ॥ यदि भोग गगनो
पम त. किं ॥२७॥ इह धर्म विधर्म विराग परं इह वस्तु विवस्तु वि. ॥ इह काम विकाम विकार परं किं
॥२८॥ न कुरंकुर साम्य विसार इति न चलाचल साम्य वि. ॥ अविचार विचार विहीन मिति किं ॥२९

॥श्रीगणेशायनमः॥ बहुधाश्रुतयः प्रवदंति यतो वियदादिरिदं मृगतोयसमं॥ यदि चैकनिरंतरसर्वशिवं उपमा च कथं उपमेय कथं॥१॥ अविभक्तविभक्तविहीनपरं ननु कार्यविकारवि॥ यदि॰ यजनं च कथं स्तवनं च कथं॥२॥ मन एव निरंतरसर्वगतं मनजीनविचारेण सर्वपरं॥ यदि॰ मनसा च कथं वचसा च कथं॥३॥ दिनरात्रिविभागनिराकरणं उदितो नु दितस्य नि॥ यदि॰ रविचंद्रमसोज्वलनं च कथं॥४॥ गतकाम्यविकाम्यविभेद इति गतचेष्टकचेष्टिकभेद इति॥ यदि॰ बहिरंतरसंधिविभाति कथं॥५॥ नहि सारविसारविकार इति इह शून्यविशून्यविहीन इति॥ यदि॰ प्रथमं च कथं द्वितीयं च कथं॥६॥ यदि भेदकभेद्यनिराकरणं यदि वेदकवेद्यनिराकरणं॥ यदि॰ तृतीयं च कथं तुरियं च कथं॥७॥ गदितागदितं नहि

सत्यमिति विहितावि हितं नहि॥ यदि॰ विषयेंद्रियबुद्धिमनांसि कथं॥८॥ यदि कल्पितलोकनिराकरणं यदि कल्पितदेव॰॥ यदि॰ गुणदोषविचार इति श्च कथं॥९॥ गगनोपवनो नहि सत्यमिति धरणिदहनो न॥ यदि॰ ज्वलनं च कथं सलिलं च कथं॥१०॥ मरणामरणं हि निराकरणं करणाकरणं हि नि॥ यदि॰ गमनागमनं हि वदंति कथं॥११॥ प्रकृतिः पुरुषो नहि भेद इति नहि कारणकर्तृविभेद इति॥ यदि॰ पुरतः पुरतश्च कथं हि भवान्॥१२॥ त्रितयं नहि दुःखसमागमनं नगुणत्रयं च स॥ यदि॰ स्थविरश्च युवा च शिशुश्च कथं॥१३॥ ननु आश्रमवर्णविहीन इति ननु कर्मककर्तृवि॥ यदि॰ अविनाशविनाशनश्च कथं॥१४॥ ग्रसिताग्रसितं च वितथ्यमिति जनिताजनितं च वितथ्य॥ यदि॰ अविनष्टविनष्टक थं हि भवान्॥१५॥

पुरुषापुरुषश्च विनष्ट इति विनिनाव निलश्च विनष्ट इति ॥ यदि॰ अविनोद विनोदमतिश्च कथं ॥१६॥ य दि मोह विषादविहीन परः यदि शोकविशोक वि॰ ॥ यदि॰ इह नेति ममेति कथं हि मनः ॥१७॥ न सिलासिल वर्णविभाग इति न परापर भोग वि॰ ॥ यदि॰ ननु सारविसारविभक्त कथं ॥१८॥ ननु धर्मविधर्मविनाश इति ननु बंधविबंधविनाश ॥ यदि॰ इह दुःखविदुःखमनश्च कथं ॥१९॥ न हि याज्ञिकयाग विभाग इति न हुवा शनवस्तु वि॰ ॥ यदि॰ ननु कर्मफलानि भवंति कथं ॥२०॥ यदि पूर्णविपूर्णविहीन इति यदि सर्वविवर्जित इति ॥ यदि॰ इह लर्क विलर्क वचांसि कथं ॥२१॥ उपसंहत बुद्धि विबुद्धि इति उपसंहत भेद विभेद इति ॥ यदि॰ अविवेक विवेकमतिश्च कथं ॥२२॥ ननु शोक विशोक विमुक्तो इति ननु दर्प विदर्प वि॰ ॥

यदि॰ अहमितीच कथं हि ममेति कथं ॥२३॥ न हि मोह विमोह विकार इति न हि लोभ विलोभ वि॰ ॥ यदि॰ ननु संग विसंगमतिश्च कथं ॥२४॥ गुरुशिष्य विचार विशीर्ण इति उपदेश वि॰ ॥ अहमेव शिवः परमार्थ इति अभिवादनमत्र करोमि कथं ॥२५॥ न हि कल्पित देव विभाग इति न हि लो क विभा॰ ॥ अहमे॰ अभि॰ ॥२६॥ सरजाविरजान कदाचिदपि ननु निर्मलनिश्चल शुद्ध इति ॥ अह मे॰ ॥२७॥ उपसंहत बुद्धि॰ ॥२८॥ विंदति॰ ॥२९॥ रथ्याकर्पटविरचितकंथः पुण्यापुण्यविवर्जितपंथः ॥ शून्यागारे तिष्ठति नग्नः शुद्धनिरंजनसमरसमग्नः ॥३०॥ इति श्रीअवधूतगीतायां दत्तात्रेयगोरक्षसंवादे षष्ठमोध्यायः ॥६॥ श्रीमद्दत्तात्रेयार्पणमस्तु ॥ अवधूतायनमः ॥

अ. ॥२९॥

॥श्रीगणेशाय नमः॥ रथ्याकर्पटविरचितकंथः पुण्यापुण्यविवर्जितपंथा॥ शून्यागारे तिष्ठति नग्नः शुद्धनिरंजनसमरसमग्नः॥१॥ लक्षालक्षविवर्जितलक्ष्यो युक्तायुक्तविवर्जितदक्षः॥ केवलतत्त्वनिरंजनपूतो वादविवादः कथमवधूतः॥२॥ आशापाशविबंधनमुक्तः शौचाचारविचारविमुक्तः॥ एवं सर्वविवर्जितसंतस्तत्त्वविशुद्धनिर्जितवंतः॥३॥ निर्मलनिश्चलगगनाकारो वयमिह तत्त्वं सहजाकारं॥ कथमिह देहविदेहविचारः कथमिह रागविरागविरागः॥४॥ ब्रह्मादितत्त्वं विदलियत्र रूपअरूपं कथमिह तत्त्वं॥ गगनाकारः परमो यत्र विषयीकरणं कथमिह तत्त्वं॥५॥ तीरविचारनिरंतरहंसस्तत्त्वविशेषरहितो हंसः॥ एवं कथमिह भिन्नाभिन्नं बंधविबंधो यत्र विकारो विभि॥

॥२९॥

न्नः॥६॥ वयमिह तत्त्वं विंदलियत्र रूपअरूपं कथमिह तत्त्वं॥ गगनाकारः परमो यत्र विषयीकरणं कथमिह तत्त्वं॥७॥ केवलतत्त्वनिरंतरसर्वं योगवियोगौ कथमिह तत्त्वं॥ सत्यासत्यं नास्ति न हि संसारं एवं कथमिह सारविसारं॥८॥ केवलतत्त्वनिरंतरबुद्धं केवलशुद्धं॥ एवं कथमिह संगासंगं संयं कथमिह रंगविरंगं॥९॥ योगवियोगै रहितो योगी भोगविभोगै रहितो भोगी॥ एवं चरति हि मंदं मंदं मनसा कल्पितसहजानंदं॥१०॥ बोधविबोधैः सततं युक्तो द्वैताद्वैतं कथमिह युक्तं॥ सरजो विरजः कथमिह योगी शुद्धनिरंजनसमरसभोगी॥११॥ भग्नाभग्नविवर्जितलग्नो लग्नालग्नविवर्जितभग्नः॥ एवं कथमिह सारविसारं समरसतत्त्वं गगनाकारं॥१२॥ सततसर्ववि

वर्जितमुक्तः सर्वरहितसविवर्जितमुक्तः ॥१२॥ एवं कथमिह जीवितमरणं ध्यानाध्यानैः कथमिह करणं ॥
१३॥ इंद्रजालमिदं सर्वं यथा मरुमरीचिका ॥ अखंडितमनाकारो वर्तते केवलः शिवः ॥१४॥
धर्मादौ मोक्षपर्यंतं निरीहाः सर्वथा वयं ॥ कथं रागविरागैश्च कल्पयंति विपश्चितः ॥१५॥ ब्र
ह्मादिलोकपर्यंतं मायामात्रे निरंतरं ॥ तन्नाशात्सहजाच्चैकं चैकं किं प्रतिपादितं ॥१६॥ वि
देति ॥१७॥ इति श्रीअवधूतगीतायां दत्तात्रेयगोरक्षसंवादे सप्तमोध्यायः ॥७॥ श्रीदत्ताय॰
श्रीगणेशाय नमः ॥ ॐ रामानं चामलं हित्वा अभिन्नं साक्षिमव्ययं ॥ गतो हि कुत्सितः कालो व
र्तितो नरकं प्रति ॥१॥ कर्मणा मनसा वाचा सेवितं मंगलोचने ॥ न च स्वर्गापवर्गो वा स्वानंदो हृ

येयदि ॥२॥ न जानामि कथं केन निर्मितां मंगलोचने ॥ विश्वासघातका बुद्धिः स्वर्गमोक्षसुखार्गला
॥३॥ मूत्रशोणितदुर्गंधो अमेध्यद्वारधूपितं ॥ चर्मखंडे यरमंति क्रमयस्तेन संशयः ॥४॥ कोटि
ल्यं दंभसंयुक्तं सर्वशोचं न विप्लवं ॥ केनापि निर्मिता नारी बंधनं सर्वदेहिनां ॥५॥ त्रैलोक्यवंदनी
धात्री सा भगा नरकं कथं ॥ रतो जातो रतिस्तत्र हा हा संसारसंस्थितिः ॥६॥ जानामि नरकं ना
री ध्रुवं जानामि बंधनं ॥ न जानामि कथं केन मनस्तत्रैव धावति ॥७॥ भगादिकुचपर्यंतं संसि
द्धि नरकार्णवं ॥ ये रमंति पुनस्तत्र तरंति नरकं कथं ॥८॥ विष्टादि नरकद्वारं नगभ्यपरिनिर्मितं ॥
किंत्वपश्यसि रचितं कथं तत्रैव धावसि ॥९॥ भगेन चर्मखंडेन दुर्गंधमव्रणेन च ॥ खंडितं च जगत्

वैसिद्धाश्च सुरतापसाः ॥१०॥ देहार्णवे महाघोरे पूर्णे पिशुक्कन्तोणिते ॥ केनापि निर्मिता
नारि भगं चवउवा मुखं ॥११॥ अंतरे नरकं विद्धि कौटिल्यं बहिर्मंडलं ॥ ललनाकिं न पश्यंत
इहासुखविहीनतं ॥१२॥ किन्न पश्यसि रोचिन्नस्सभवानकेकूपिकां ॥ दुर्गंधि रौरवं गधकर्थंन
त्रैवधावसि ॥१३॥ यस्मात्तु जीवनबंधे भवेन्नत्रैव देहिनं ॥ यतो यतो रतिस्तत्र अहा भव विडं
बना ॥१४॥ ब्रह्मसुखंति ऋषयः सदेवाः सुरमानुषाः ॥ तेयांति नरकं घोरं सत्यमेवेन संश
यः ॥१५॥ अग्निकुंडसमा नारी घृतकुंभसमो नरः ॥ संसर्गादि लयं याति तस्मात्तां परि
वर्जयेत् ॥१६॥ गौडी माध्वी तथा पौष्टि विज्ञेया त्रिविधा सुरा ॥ चतुर्थी स्त्री सुरा ज्ञेया यथा एवं

मोहितं जगत् ॥१७॥ मद्यपाने महत्पापं नारीसंग तथा भवेत् ॥ तस्माद् द्वंद्वं परित्यज्य न वंति न
रके यथा ॥१८॥ आमोहयति सा धूर्तो नारी बुध्यात याकृयं ॥ अ स्वस्थं कुरुते चित्तं नारी यत्र
यजेच्चवतां ॥१९॥ चर्मपत्रं द्विधाभिन्नं अपानद्वारवासितं ॥ तत्स्वमूत्रमजलिप्राणैरपि घनैर
पि ॥२०॥ चितायसंधातु बधं शरीरं न ष्टे चित्तधातवो यांति नारां ॥ तस्माच्चित्तं यत्नतो रक्ष
णीयं स्वस्थे चित्ते बुद्धयः संभवंति ॥२१॥ इति श्री अवधूतगीतासु उपनिषद्ब्रह्मविद्यायां श्री
दत्तात्रेयकृत अनुभवोल्लासोक्त श्री दत्तात्रेयगोरक्षसंवादे स्त्रीदूषणं नाम अष्टमोऽध्यायः
॥८॥ संपूर्णमस्तु ॥ श्रीगुरुदेवदत्तावधूतदत्तार्पणमस्तु ॥ श्रीकृष्णार्पणमस्तु ॥ दत्त दत्त दत्त

अ॰
॥२६

पु॰ ७॰ २॰ ॰ १०

गी॰
॥२६॥

॥इतिअवधूतगीतासमाप्तिमगमत्॥

26